**भारतीय शिक्षा बोर्ड**

**अर्द्धवार्षिकी परीक्षा**

**संस्कृतम् – कक्षा-६**

वर्षः- २०२६-२७

**निर्धारितसमयः – होरात्रयम्** **अधिकतमाङ्काः – ८०**

---

**सामान्यनिर्देशाः —**

- प्रश्नान् ध्यानेन पठत।
- प्रश्नपत्रं पठितुं १० निमेषस्य अतिरिक्त-समयः निर्धारितः अस्ति। अस्मिन् काले छात्राः केवलं प्रश्नपत्रं पठिष्यन्ति।
- प्रश्नपत्रे सम्पूर्णाः १७ प्रश्नाः सन्ति। सर्वे च प्रश्नाः अनिवार्याः सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
    - ➢ खण्डः (क) अपठितावबोधनम् ५ अङ्काः
    - ➢ खण्डः (ख) रचनात्मकं कार्यम् 20 अङ्काः
    - ➢ खण्डः (ग) अनुप्रयुक्तव्याकरणम् २५ अङ्काः:
    - ➢ खण्डः (घ) पठितावबोधनम् ३० अङ्काः
- 'क' खण्डे एकः प्रश्नः अस्ति। १ प्रश्नसंख्यायाः कृते ०५ अङ्काः निर्धारिताः सन्ति।
- 'ख' खण्डे चत्वारः प्रश्नाः सन्ति। २,३ प्रश्नसंख्यायाः कृते ०५ अङ्काः, ४ प्रश्नसंख्यायाः कृते १० अङ्काः निर्धारिताः सन्ति।

**सामान्य निर्देश—**

- प्रश्नों को ध्यान से पढ़ें।
- प्रश्नपत्र को पढ़ने के लिए 10 मिनट का अतिरिक्त समय दिया गया है। इस दौरान छात्र केवल प्रश्नपत्र पढेंगे।
- प्रश्न पत्र में कुल 17 प्रश्न हैं। सभी प्रश्न अनिवार्य हैं।
- इस प्रश्न पत्र में चार खण्ड हैं—
    - ➢ खण्डः (क) अपठित अवबोधन 05 अंक
    - ➢ खण्डः (ख) रचनात्मक कार्य 20 अंक
    - ➢ खण्डः (ग) अनुप्रयुक्त व्याकरण 25 अंक
    - ➢ खण्डः (घ) पठित अवबोधन 30 अंक
- 'क' खण्ड में एक प्रश्न है। प्रश्न सं. 1 के लिए 5 अंक निर्धारित हैं।
- 'ख' खण्ड में चार प्रश्न हैं। प्रश्न सं. 2,3 के लिए 05 अंक तथा प्रश्न सं. 4 के लिए 10 अंक निर्धारित हैं।

- 'ग' खण्डे पञ्च प्रश्नाः सन्ति। ५ प्रश्नसंख्यायाः कृते ०४ अङ्काः, ६ प्रश्नसंख्यायाः कृते ६ अङ्काः, ७ प्रश्नसंख्यायाः कृते ०५ अङ्काः, ८ प्रश्नसंख्यायाः कृते ०६ अङ्काः, ९ प्रश्नसंख्यायाः कृते ०४ अङ्काः निर्धारिताः सन्ति।
- 'घ' खण्डे अष्टप्रश्नाः सन्ति। १० प्रश्नसंख्यायाः कृते ०५ अङ्काः, ११ प्रश्नसंख्यायाः कृते ०५ अङ्काः, १२ प्रश्नसंख्यायाः कृते ०४ अङ्काः, १३ प्रश्नसंख्यायाः कृते ०३ अङ्काः, १४ प्रश्नसंख्यायाः कृते ०५ अङ्काः, १५ प्रश्नसंख्यायाः कृते ०३ अङ्काः, १६ प्रश्नसंख्यायाः कृते २.५ अङ्काः, १७ प्रश्नसंख्यायाः कृते २.५ अङ्काः निर्धारिताः सन्ति।

- 'ग' खण्ड में पाँच प्रश्न हैं। प्रश्न सं. 5 के लिए 04 अंक, प्र. सं. 6 के लिए 6 अंक, प्रश्नसंख्या 7 के लिए 05 अंक, प्रश्नसंख्या 8 के लिए 06 अंक, प्रश्नसंख्या 9 के लिए 04 अंक निर्धारित हैं।
- 'घ' खण्ड में आठ प्रश्न हैं। प्रश्न सं. 10 के लिए 05 अंक, प्र. सं. 11 के लिए 05 अंक, प्रश्नसंख्या 12 के लिए 04 अंक, प्रश्नसंख्या 13 के लिए 03 अंक, प्रश्नसंख्या 14 के लिए 05 अंक, प्रश्नसंख्या 15 के लिए 03 अंक, प्रश्नसंख्या 16 के लिए 2.5 अंक एवं प्रश्नसंख्या 17 के लिए 2.5 अंक निर्धारित हैं।

---

## खण्डः- क (अपठितावबोधनम्)

1. निम्नलिखितं गद्यांशं पठित्वा उत्तराणि संस्कृतेन लिखत— 05

समाचारपत्रं जीवनस्य अनिवार्यम् अङ्गं जातम्। प्रातः भवति सति दैनिकं समाचारपत्रं गृहे-गृहे आगच्छति। गृहस्य सदस्याः समाचारपत्रस्य प्रतीक्षां कुर्वन्ति। जनकः समाचारं पठितुम् इच्छति, पुत्रः खेलसमाचारं ज्ञातुम् उत्सुकः। समाचारपत्रे न केवलं देशविदेश-वार्ताः, अर्थनीति-राजनीति-समाचाराः अपितु लेखाः, कथाः कार्टूनचित्राणि अपि सन्ति। समाचारपत्र-पठनेन ज्ञानवृद्धिः भवति। बालाः, युवकाः, वृद्धाः गृहण्यः सर्वे किञ्चित् रुचिकरम् अत्र लभन्ते। समाचारपत्राणि विविधासु भाषासु प्रकाशिताः भवन्ति।

प्रश्नाः

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) जीवनस्य अनिवार्यम् अङ्गं किम्? ______________।

(ii) गृहसदस्याः कस्य प्रतीक्षां कुर्वन्ति? ______________।

(ख) पूर्णवाक्येन उत्तरयत— **1×2=2**

(i) जनकः किं पठितुम इच्छति? ____________________।

(ii) के के अत्र रुचिकरं लभन्ते? ____________________।

(ग) भाषिकप्रश्नाः— **1×2=2**

(i) 'विविधासु भाषासु' अत्र अनयोः पदयोः विशेषणपदं किम्?

____________________________________________________।

(ii) 'अरुचिकरम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

____________________________________________________।

## खण्डः- ख (रचनात्मकलेखनम्)

2. विपरीतार्थकपदानि यथायोगं मेलयत— **1/2×10=5**

| | |
|---|---|
| (क) सुजलाम् | (i) अस्ति |
| (ख) सुखदाम् | (ii) अपरीक्षितम् |
| (ग) नास्ति | (iii) निर्जलाम् |
| (घ) सुपरीक्षितम् | (iv) दुःखदाम् |
| (ङ) ऋतम् | (v) अधिकम् |
| (च) ऊनम् | (vi) दुःखी |
| (छ) अनादिः | (vii) कृतघ्नः |
| (ज) कृतज्ञः | (viii) रात्रिः |
| (झ) सुखी | (ix) अनृतम् |
| (ञ) अहः | (x) आदिः |



3. अधोलिखित-पदानां सन्धिं कुरुत— **1×5=5**

(क) ब्रह्मचर्यम् + आयुष्याणाम् __________

(ख) प्रति + एकम् __________

(ग) यदि + अपि __________

(घ) न + अनृतम् ________

(ङ) माता + अपि ________

4. 'अ' भागः

प्रकृति-प्रत्यय-युक्तं रूपं रिक्तस्थाने लिखत— **1×5=5**

(क) कृ + क्त्वा = ________

(ख) गम् + क्त = ________

(ग) दा + क्त्वा = ________

(घ) भी + क्त = ________

(ङ) श्रु + क्त = ________

'आ' भागः

अधोलिखितानां पदानां विभक्तिं वचनञ्च लिखत— **1×5=5**

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | लोके | ________ | ________ |
| (ख) | पथ्यानाम् | ________ | ________ |
| (ग) | पूर्णिमा | ________ | ________ |
| (घ) | त्वया | ________ | ________ |
| (ङ) | शय्यायाम् | ________ | ________ |

## खण्डः- ग (अनुप्रयुक्त-व्याकरणम्)

5. पर्यायपदानि पट्टिकातः चित्वा लिखत— **1/2×8=4**

शत्रुः, दिनकरः, शिशिरः, उष्णः, संसारे, वरम्, गरिष्ठभोजनम्, चन्द्रिका

(क) ज्योत्सना ________________।

(ख) रिपुः ________________।

(ग) ग्रीष्मः ________________।

(घ) शीतः ________________।

(ङ) सूर्यः ____________________।

(च) लोके ____________________।

(छ) श्रेष्ठम् ____________________।

(ज) गुरुभोजनम् ____________________।

6. अधोलिखितानि क्रियापदानि प्रयुज्य वाक्यानि रचयत— **1×6=6**

(क) सन्ति ____________________।

(ख) गच्छति ____________________।

(ग) पठसि ____________________।

(घ) धावामि ____________________।

(ङ) कुरुतः ____________________।

(च) चलामः ____________________।

7. अधोलिखितानां शब्दानां द्वौ-द्वौ समानार्थकौ शब्दौ पट्टिकातः चित्वा लिखत— **1×5=5**

| अर्धांगिनी, पवित्राम्, अवदत्, धरा, शुद्धाम्, विटपाः, पत्नी, अकथयत, भूः, वृक्षाः |
|---|

(क) अमलाम् __________ __________

(ख) भार्या __________ __________

(ग) उवाच __________ __________

(घ) पृथिवी __________ __________

(ङ) तरवः __________ __________

8. समुचितं वाक्यांशं मेलयत— **1×6=6**

(क) अपरीक्ष्य न कर्तव्यं • • (i) आरोग्यकराणाम्।

(ख) फुल्लकुसुमित • • (ii) न बिभीतो न रिष्यतः।

(ग) यथा सूर्यश्च चन्द्रश्च • • (iii) कर्तव्यं सुपरीक्षितम्।

| | | | | |
|---|---|---|---|---|
| (घ) | चारित्रेण च को युक्तः | ● | ● | (iv) द्रुमदल-शोभिनीम्। |
| (ङ) | कालभोजनम् | ● | ● | (v) तपस्वी वाग्विदां वरम्। |
| (च) | तपः स्वाध्यायनिरतं | ● | ● | (vi) सर्वभूतेषु को हितः। |

9. अधोलिखितपदानां सम्मुखे बहुवचनरूपं विलिख्य विभक्तिं पुरुषं च लिखत— **1/2×8=4**

| | | बहुवचने | विभक्तिः / पुरुषः |
|---|---|---|---|
| (क) | हरये | ________ | ________ |
| (ख) | भानुना | ________ | ________ |
| (ग) | आत्मानम् | ________ | ________ |
| (घ) | कर्तारम् | ________ | ________ |
| (ङ) | गच्छसि | ________ | ________ |
| (च) | अवदम् | ________ | ________ |
| (छ) | गमिष्यति | ________ | ________ |
| (ज) | वदति | ________ | ________ |

## खण्डः- घ (पठितावबोधनम्)

10. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत— **05**

ग्रीष्मे आतपः प्रचण्डः भवति। तप्ताः पवनाः प्रवान्ति। शरीरे बहु प्रस्वेदः उत्पद्यते। दिवसाः शनैः शनैः वृद्धिं यान्ति, निशाः च क्षीणाः भवन्ति। शीतलं जलं पातुम् अभिलाषः जायते। मानवाः तापभयेन मध्याह्ने गृहाद् बहिः न यान्ति। वर्षासु मेघाः वारीणि वर्षन्ति।

प्रश्नाः

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) कदा आतपः प्रचण्डः भवति? ____________________।

(ii) वर्षासु के वारीणि वर्षन्ति? ____________________।

(ख) पूर्णवाक्येन उत्तरयत— **1×2=2**

(i) दिवसाः निशाः च शनैः शनैः कीदृशाः भवन्ति?

________________________________________।

(ii) मानवाः तापभयेन किं कुर्वन्ति?

________________________________________।

(ग) भाषिकाः प्रश्नाः— **1×2=2**

(i) 'छाया' इति पदस्य विलोमपदं चिनुत—

अ. प्रस्वेदः ☐ ब. अभिलाषः ☐ स. आतपः ☐

(ii) 'जलदाः' इति पदस्य पर्यायपदं चिनुत—

अ. आतपः ☐ ब. मेघाः ☐ स. तप्ताः ☐

11. पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत— 05

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।

पश्चाद् भवति सन्तापो ब्राह्मण्या नकुले यथा।।

प्रश्नाः

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) कीदृशं न कर्तव्यम्? ____________________।

(ii) पश्चात् कः भवति? ____________________।

(ख) पूर्णवाक्येन उत्तरयत— **1×2=2**

(i) कीदृशं कर्तव्यम्? ____________________।

(ii) ब्राह्मण्याः सन्तापः कदा भवति? ____________________।

(ग) भाषिकाः प्रश्नाः— **1×2=2**

(i) 'अविचार्य' इति पदस्य पर्यायपदं किम्?

अ. अपरीक्ष्य ☐ ब. सन्तापः ☐ स. कर्तव्यम्। ☐

(ii) 'सन्तोषः' इति पदस्य विलोमपदं किं प्रयुक्तम्?

अ. पश्चात् ☐ ब. सन्तापः ☐ स. अपरीक्ष्य। ☐

12. अधोलिखितानि कथनानि पठित्वा 'शुद्धम्' 'अशुद्धम्' वा इति समक्षं लिखत— **1×4=4**

(क) नकुली नकुलं प्रसूय जीविता। ____________।

(ख) वसन्ते तरवः पुष्प्यन्ति। ____________।

(ग) गुरुभोजनं दुर्विपाककराणाम्। ____________

(घ) व्यायामः स्थैर्यकराणाम्। ____________

13. पर्यायपदानि चित्वा लिखत— **1/2×6=3**

द्युलोकः, निकटे, शशिः, शत्रुदमनः, निशा, कान्तिमान्

(क) समीपे ____________।

(ख) द्यौः ____________।

(ग) रात्री ____________।

(घ) चन्द्रः ____________।

(ङ) अरिन्दमः ____________।

(च) द्युतिमान् ____________।

14. विग्रहस्य समासयुक्तं रूपं पट्टिकातः चित्वा लिखत— **1×5=5**

धर्मज्ञः, कालभोजनम्, जलकुम्भम्, अनादिः, शस्यश्यामलाम्

(क) शस्येन श्यामलाम् ____________।

(ख) जलस्य कुम्भम् ____________।

(ग) न आदिः ____________।

(घ) धर्मं जानाति सः ____________।

(ङ) काले भोजनम् ____________।

15. सन्धिं संयोगं च कुरुत— **1×3=3**

(क) विद्यार्थम् = ________ + ________

(ख) सूर्यश्च = ________ + ________

(ग) सूर्य + उदय: = ________

16. शब्दरूपाणि पूरयत— **1/2×5=2.5**

| **विभक्ति:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | हरि: | हरी | ________ |
| द्वितीया | भानुम् | ________ | भानून् |
| तृतीया | ________ | कर्तृभ्याम् | कर्तृभि: |
| षष्ठी | ________ | कर्त्रो: | कतॄनाम् |
| सप्तमी | भानौ | भान्वो: | ________ |

17. धातुरूपाणि पूरयत— **1/2×5=2.5**

| **पुरुष:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मध्यमपुरूष: | गच्छसि | ________ | गच्छथ |
| उत्तमपुरुष: | ________ | वदाव: | वदाम: |
| प्रथमपुरुष: | गच्छति | गच्छत: | ________ |
| मध्यमपुरुष: | ________ | वदिष्यथ: | वदिष्यथ |
| उत्तमपुरुष: | गच्छानि | ________ | गच्छाम |